International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 33-34
© 2025 IJMH
www.themultijournal.com
Received: 19-07-2025
Accepted: 21-07-2025
Publish : 25-07-2025

**सौपीक्सुमनपरिडा**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**सौपीक्सुमनपरिडा**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# श्रीमद्भद्रेशस्वामिविरचितप्रस्थानत्रयीभाष्येऽक्षरपुरुषोत्तमदर्शनस्यैकमनुशीलनम्

**सौपीक्सुमनपरिडा**

**शोधसारः**

श्रीमद्भद्रेशस्वामिपादैर्ब्रह्मसूत्रभगवद्गीतोपनिषदां परिनिष्ठितमेकेश्वरपर्यवसानयुक्तनित्यं शाश्वतिकं स्वामिनारायणपरकमक्षरपुरुषोत्तमदर्शनप्रतिपादकसिद्धान्तः प्रतिपादितो वर्तते। अत्र भद्रेशस्वामिना अक्षरधाम्नि नित्यनिवसतां पुरुषोत्तमपरमाराध्यस्वामिनारायणभगवतां श्रेष्ठत्वमेकब्रह्मपरकत्वं विचाराः सुतरामस्य दर्शनस्य प्रतिपाद्यपरिनिष्ठितभाष्यं वर्तते। अत्र ब्रह्मसूत्रभाष्ये भद्रेशस्वामिपादैस्तावत् सर्वस्य चराचरात्मकस्य जगतो मूलकारणत्वेन स्वामि-नारायणात्मकदेवस्य सान्निध्यता स्पष्टीकृता वर्तते। तद्वत् उपनिषत्सु विद्यमानानां शाश्वतिक-सिद्धान्तानामेकब्रह्मत्वपर्यवसानं भजते। भगवद्गीतायामपि उक्तानां रहस्यानां जन्मबन्धादीनां कारणं शास्त्रैकनिष्ठं परब्रह्मैकत्वं सर्वधर्मान् परित्यज्य स्वामिनारायणस्य सान्निध्यं सुतरां भजेत इति सिद्धान्तः स्वतस्तैः साधितो वर्तते।

**पारिभाषिकशब्दाः –** अक्षरब्रह्म, ब्रह्मसूत्रं, अध्यात्मं, पुरुषोत्तमः

भगवद्गीतायामष्टमाध्याये तावदर्जुनेन पृष्टस्य प्रश्नस्य याथार्थ्यं स्पष्टीकर्तुं भगवता श्रीकृष्णेन ब्रह्मणः शाश्वतिकरहस्यमक्षरब्रह्मत्वेन दर्शितम्। यथोच्यते -

**किं तद् ब्रह्म किमध्यात्मं कि कर्म पुरुषोत्तमः।**
**अधिभूतं च कि प्रोक्तमधिदैवं किमुच्यते॥**[1]

अत्र ब्रह्म किं स्वरूपभूतमिति अध्यात्ममधिभूतमधिदैवमित्येतेषामपि स्वरूपं किमिति प्रश्ने भगवता स्पष्टीकृतं यत् अक्षरं ब्रह्म इति व्यजानादिति शास्त्रोक्तप्रसिद्धिमवाप्य अनेन भद्रेशस्वामिना शास्त्रप्रपृत्तये स्वामिनारायणात्मकमक्षरपुरुषोत्तमदर्शनप्रतिपादकसिद्धान्तः स्पष्टीकृतो वर्तते। अतः अस्मिन् सिद्धान्ते स्वतः सर्वत्र स्वामिनारायणस्याक्षरब्रह्मत्वेन शास्त्रं प्रसक्तिः। तत्र अक्षरं ब्रह्मेति ध्यत्वा जीवानां स्वस्वरूपमेव अध्यात्मं भूतेभ्यः उत्पद्यमानानां विकाराणां कर्मत्वेन प्रसक्तिः ध्यायते। अस्य व्याख्यानवेलायां स्वामिपादैः इत्थमक्षरब्रह्मत्वेन स्वामिनारायणस्य सिद्धिः भाष्यपङ्क्तौ बहुधा स्पष्टीकृतम्। सर्वं जगति विद्यमानमधिभूतसंज्ञकं मन्यते। अत्र अधिभूतत्वेन प्रसक्तस्य हिरण्मयपुरुषः एव अधिदेवत्वेन सर्वस्मिन् शरीरे नित्यं विद्यमानः अन्तर्यामिस्वरूपभूताधियज्ञो वर्तते। तदर्थमपि गीतायां कथ्यते यत् -

**अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।**
**भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥**
**अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।**
**अधियज्ञोऽहमेवात्र देहे देहभृतां वर॥**[2]

अत्र भाष्यप्रसङ्गे तत्र भद्रेशस्वामिना परमं परमात्मातिरिक्तसर्वजीवेश्वरमायात-न्मुक्तेभ्यः सर्वदा स्वरूपस्वभावशक्तिसामर्थ्यादिना परभूतमक्षरमेव ब्रह्म ब्रह्मतत्त्वमिति व्याख्यातम्। तत्र अक्षरं न क्षरं विद्याद् इत्यस्मिन् सन्दर्भे परमात्मातिरिक्तसर्वजीवेश्वरमाया-ऽक्षरमुक्तेभ्योऽतिशयोत्कर्षविशिष्टमक्षरं ब्रह्मेति शब्दार्थः स्वामिनारायणपरत्वे अक्षरब्रह्मत्वेन स्पष्टीकृतो वर्तते। किञ्चान्यत्र

**महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।**
**भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥**[3]

अत्र महात्मानस्तु परमपुरुषोत्तमस्वामिनारयणस्वरूपाभियोगान्महीयत आत्मा येषां ते तथाविधाः इति श्रूयते। उपनिषदां भाष्यप्रसङ्गे तत्र तत्र **"प्रज्ञानब्रह्मे**[4]ति ऐतरेयोपनिषदि **"अयमात्मा ब्रह्म**[5] बृहदारण्यकोपनिषदि **"तत्त्वमसि**[6] छान्दोग्यो-पनिषदि **"अहं ब्रह्मोऽस्मि**[7]मुण्डकोपनिषदि आनन्दं ब्रह्मेति व्यजानादित्येतेषां ब्रह्मपरकानां चिन्तनानां शाश्वतिकसिद्धान्तास्तु स्वामिनारायणात्मके प्रसक्ततां प्रतिपाद्य तत्रैव अक्षरपुरुषोत्तमः एव शाश्वतिकब्रह्मस्वरूपमिति भावना बहुधा स्वामिपादैः स्पष्टीकृता वर्तते। अतः अयमक्षरपुरुषोत्तमदर्शनप्रतिपादक-सिद्धान्तस्तु साम्प्रतिके काले बहुधा सेव्यते।

किञ्चात्र ब्रह्मसूत्रभाष्यप्रसक्तौ सर्वादौ "**अथातो ब्रह्मजिज्ञासा"**[8] इति सूत्रस्य ब्रह्मपरकत्वेन स्वामिनारायणस्याक्षरब्रह्मत्वनिमित्तं सुतरां जिज्ञासा कर्त्तव्या यस्मात् च सकलं जगत् आविर्भवति। अतः परब्रह्मत्वेन स्वामिनारायणस्य अक्षरब्रह्मतत्त्वमत्र बहुधा साधितं वर्तते।

वेदान्तवाक्येषु ब्रह्मसूत्रोपनिषद्भगवद्गीताख्यपरमतत्त्वेषु तत्र तत्र अक्षरपुरुषोत्तमदर्शनं श्रीमद्भद्रेशस्वामिना बहुधा आम्नातं वर्तते। तत्र उपनिषदां भाष्यप्रसङ्गे स्वामिनारायणस्यैव तत्र अक्षरपुरुषोत्तमत्वेन विचारः प्रतिपादितो वर्तते। अत्र एवं व्याख्यानं प्राप्यते यथा श्रुतिप्रसिद्धश्चैतयोर्ब्रह्मशब्देन साक्षात् व्यपदेशः। यथा हि षट्प्रश्नात्मके प्रश्नोपनिषदि सत्यकामादीनां जिज्ञासायाः प्रशमनार्थं गुरुः प्रत्युत्तरं विदधाति तत्र **एतद् वै सत्यकाम परं चाऽपरं च ब्रह्म यदोङ्कारः**[9] इत्यत्र ओङ्कारस्य पुरुषोत्तमप्रतिपादकसिद्धान्तस्तु महर्षिणा पिप्पलादेन बहुधा प्रतिपादितम्। तत्र परमपरमिति तत्त्वद्वयमादाय सर्वत्रापि ब्रह्मपरंब्रह्मपरक-त्वेन निःश्रेयससाधनभूतानां रहस्यानां ब्रह्मतत्त्वानां प्रतिपादने वेदान्तवाक्येषु अनुगृह्यते। ब्रह्मसूत्रस्य भाष्यप्रसङ्गे जिज्ञासाधिकरणे तावत् अथातो ब्रह्मजिज्ञासेति सूत्रस्य भाष्ये श्रीमद्भद्रेशस्वामिना ब्रह्मणो जिज्ञासा इत्यत्र दिव्यतत्त्वद्वयं ब्रह्मपरंब्रह्मस्वरूपभूतं परमपरमिति तत्त्वद्वयात्मकमक्षरपुरुषोत्तमस्य जिज्ञासा विधातव्येति व्याख्यानं स्पष्टीकृतम्। स्वविषयस्य प्रकृतित्वात्तद्विषयीभूतः अक्षरपुरुषोत्तमाख्यदिव्यतत्त्वद्वयज्ञानप्रवृत्तिगतत्वेन तद्विधानं सुतरां काम्यमिति व्यपदिश्यते। यथोक्तं भाष्यादौ भद्रेशस्वामिना

**स्वामिस्त्वं हि समन्वयं सुसहजं ब्रह्माक्षराधीशयो**
**धीमौढ्याऽऽढ्यकुतर्कखण्डसकलान् सत्तर्कभासा किल।**
**भक्तावौपयिकं तु साधनगुरुं ब्रह्मैक्यसंलक्षणं**
**कुर्वाणः परिकुण्ठयन् परिदधद् दद्या अनावर्तनम्॥**[10]

ब्रह्मैकनिष्ठत्वं प्रतिपादनावसरे ब्रह्माक्षरयुक्तगुरुसान्निध्यमपि सुतरां ब्रह्मविद्याप्राप्ति-हेतुभूतं रहस्यमभिधत्ते। अतः अस्य स्वामिनारायणस्यापारकृपया एव गुरुसान्निध्यं लब्ध्वा पुरुषोत्तमस्य स्वामिनारायणस्यानन्तगुणान् स्पष्टीकर्त्तुं कश्चित् शक्नुयादिति भद्रेशस्वामिनः आशयो विद्यते।

**नारायणस्वरूपे तु नारायणस्वरूपधीः।**
**जायतामिति हार्दोऽयं भावो भाष्यविलेखने॥**[11]

वेदान्तभाष्यप्रसङ्गे शारीरिकभाष्ये शाङ्करेण ब्रह्मणो नित्यत्वं शाश्वतं स्वरूपं बहुधा उक्तम्। तच्च स्वरूपमत्र स्वामिनारायणे प्रतिपत्तिजनयितुं भाष्यकारेण श्रीमद्भद्रेशस्वामिना स्वीये भाष्ये स्पष्टीकृतम्। अतः अस्य भाष्यस्य प्रसक्तिः स्वामिनारायणे ईश्वरतत्त्वे सर्वदेवानां सर्वशक्तीनां सर्वरहस्यानामन्तर्भावकारणादेव श्लाघ्यते।

वेदान्तशास्त्रे एतेषां तत्त्वानां विमर्शो बहुधा शास्त्रकारैः आम्नातं वर्तते। मायायाः शक्तिः वेदान्तसारप्रभृतिषु ग्रन्थेषु विचार्यते। तच्च ईश्वरस्य शक्तिभूतत्वेन येन संसारस्य सर्जनं भवति कृत्स्नस्य जीवजातस्य प्रसक्तिः तस्मादेव समजायत इत्यत्र श्रूयते।

**उपसंहारः**

इत्थमक्षरपुरुषोत्तमदर्शनप्रतिपादकभाष्यं प्रणीय श्रीमद्भद्रेशस्वामिपादैस्तावत् ब्रह्मसूत्रं भगवद्गीतोपनिषदाश्च व्याख्यातम्। अस्य भाष्यस्य प्रसक्तिः सुतरां सर्वैराद्रियते। अत्र स्वामिनारायणे सर्वसिद्धान्तानां तात्पर्यपर्यवसानत्वं लक्ष्यते। ब्रह्मसूत्रभगवद्गीतोपनिषदां भाष्ये सुतरां इत्थं मतं भद्रेशस्वामिपादैः स्पष्टीकृतम्।

**सहायकग्रन्थसूची**


१. ईशाद्यष्टोपनिषत् स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेशदासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४
२. श्रीमद्भगवद्गीता स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेशदासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४
३. ब्रह्मसूत्रम्, स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेशदासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४
४. बृहदारण्यकोपनिषद्, स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेशदासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४
५. छान्दोग्योपनिषद्, स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेशदासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४
६. ईशाद्यष्टोत्तरशतोपनिषद्- व्यासप्रकाशन, वाराणसी, २००४


**सन्दर्भग्रन्थसूची**

1 गीता. ८.१

2 गीता. ८.२-३

3 गीता. ९.१३

4 ऐ.उ. १.२

5 माण्डु.उ. १.२

6 छा. उ. ६.८.७

7 बृ. उ. १.४.१०

8 ब्र.सू. १.१.१

9 प्रश्न. उ. ५.२

10 ब्र. सू. (भ. भा.) श्लो. ८

11 ब्र. सू. (भ. भा.) श्लो. ९